# Ribhuproktam Sarvabrahmatvanirupanam

# ઋભુપ્રોક્તં સર્વબ્રહ્મત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Sarvabrahmatvanirupanam

File name : RRibhuproktaMsarvabrahmatvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 40| 7-27||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સર્વબ્રહ્મત્વનિરૂપણમ્

(સર્વં બ્રહ્મેતિ નિશ્ચિનુ)
ઇદં પ્રપઞ્ચં નાસ્ત્યેવ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
સર્વં મિથ્યા સદા મિથ્યા સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૭॥

સદા બ્રહ્મવિચારં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
તથા દ્વૈતપ્રતીતિશ્ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૮॥

સદાહં ભાવરૂપં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
નિત્યાનિત્યવિવેકં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૯॥

ભાવાભાવપ્રતીતિં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
ગુણદોષવિભાગં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૦॥

કાલાકાલવિભાગં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
અહં જીવેત્યનુભવં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૧॥

અહં મુક્તોઽસ્મ્યનુભવં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
સર્વં બ્રહ્મેતિ કલનં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૨॥

સર્વં નાસ્તીતિ વાર્તા ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
દેવતાન્તરસત્તાકં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૩॥

દેવતાન્તરપૂજા ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
દેહોઽહમિતિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૪॥

બ્રહ્માહમિતિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
ગુરુશિષ્યાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૫॥

તુલ્યાતુલ્યાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
વેદશાસ્ત્રાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૬॥

ચિત્તસત્તાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।

બુદ્ધિનિશ્ચયસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૭॥

મનોવિકલ્પસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
અહઙ્કારાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૮॥

પઞ્ચભૂતાદિસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
શબ્દાદિસત્તાસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૧૯॥

દૃગ્વાર્તાદિકસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
કર્મેન્દ્રિયાદિસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૦॥

વચનાદાનસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
મુનીન્દ્રોપેન્દ્રસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૧॥

મનોબુદ્ધ્યાદિસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
સઙ્કલ્પાધ્યાસ ઇત્યાદિ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૨॥

રુદ્રક્ષેત્રાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
પ્રાણાદિદશસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૩॥

માયા વિદ્યા દેહજીવાઃ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
સ્થૂલવ્યષ્ટાદિસઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૪॥

સૂક્ષ્મવ્યષ્ટિસમષ્ટ્યાદિ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
વ્યષ્ટ્યજ્ઞાનાદિ સઙ્કલ્પં સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૫॥

વિશ્વવૈશ્વાનરત્વં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ।
તૈજસપ્રાજ્ઞભેદં ચ સર્વં બ્રહ્મેતિ નિશ્ચિનુ ॥ ૪૦.૨૬॥

વાચ્યાર્થં ચાપિ લક્ષ્યાર્થં સર્વં બ્રહ્મેતિ નિશ્ચિનુ । ૪૦।૨૭(૧)

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં સર્વબ્રહ્મત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૪૦। ૭-૨૭॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 40. 7-27..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Sarvabrahmatvanirupanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*